# INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES

**ISSN 2277 – 9809 (online)**
**ISSN 2348 - 9359 (Print)**

*An Internationally Indexed Peer Reviewed & Refereed Journal*

www.IRJMSH.com
www.isarasolutions.com

Published by iSaRa Solutions

# मीमांसाशस्त्रस्य वेदाङ्गत्वं सम्भवति किम् ?

**Dr. C Hariharan**

Director Digital Campus,
The Madras Sanskrit College

## पुरो वाक्

यद्यपि मीमांसां पठितवतः अधीयानस्यापि क्लिष्टमेवेतन्निरूपणम्। मीमांसायाः वेदाङ्गत्व-वेदरूपत्वाभावात्, तथापि मीमांसायाः अपि वेदाङ्गत्वं वेदतुल्यत्वं वा कथञ्चित् उपपादयितुं शक्यते वा इति कश्चन प्रयासः विधातुं शक्यते वा इति पश्यामः।

ज्ञायत एवास्माभिः –

**"शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा।**
**कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः॥"**

इति षडङ्गानि वेदस्य सन्तीति। तत्र वेदाङ्गानाम् अङ्गत्वं नाम किम् इति चिन्तयामश्चेत् लौकिकभाषया अङ्गत्वं नाम अवयवत्वम् इति यद्यपि अर्थो लभ्यते, तथापि तत्तत्प्रतिपादनपरतयापि –

**"शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पोऽथ उच्यते।**
**ज्योतिषामयनं चक्षुर्मूर्च्छा व्याकरणं स्मृतम्॥**

**छन्दः पादौ तु विज्ञेयौ निरुक्तं श्रोत्रमुच्यते॥[1]"**

इत्यादयः अपि यद्यपि प्रसिद्धाः, तथापि एते सर्वेऽप्यौपचारिकाः प्रयोगाः इति वास्तविकमङ्गत्वम् एतेषां शिक्षादीनां कीदृशं स्यात् इति विचारे सति तयैव लौकिकमर्यादया, मीमांसायामेव तृतीयाध्याये बादरि-आचार्यमतानुसारेण **'उपकारकत्वम् अङ्गत्वम्[2]'** इति वक्तव्यं भवति।

तथा च, उपकारकत्वम् अङ्गत्वम् इत्यालोचयितुमारभामहे चेत् वेदाङ्गत्वेन परिगणितानां शिक्षाव्याकरणादीनां कीदृशमुपकारकत्वमस्ति, तत्र च किं साधर्म्यं भवति यच्च मीमांसायां नास्ति तेन च मीमांसायाः तत्साधर्म्याभावान् वेदाङ्गत्वेन परिगणना च नास्तीति चिन्तनीयं भवेत्।

किन्तु एवं-रीत्या विचार्यमाणे अङ्गत्वेन परिगणितानां शिक्षाव्याकरणादीनां वेदोपकारकत्वे एव समानरूपतां लक्षयितुं न शक्नुमः वयम्। यतो हि एकैकस्य अङ्गस्य अन्यान्यरूपः एव उपकारः चिन्तयितुं शक्यो भवति। कथञ्चित् वेदाध्ययनात्पूर्वं वेदाध्ययनकालीनः वा उपकारः एकस्मिन् पार्श्वे, वेदाध्ययनोत्तरकालीनः उपकारश्च मीमांसया क्रियते इति उच्यते चेत् इदमपि अङ्गत्वेन परिगणितानां षण्णां मध्ये क्वचिद्भवति क्वचिन्न भवति इत्येव आपतति। यतो हि शिक्षाशास्त्रस्य, छन्दःशास्त्रस्य, कथञ्चित् निरुक्तव्याकरणयोरपि अध्ययनकालीनः तत्पूर्वकालीनः वा उपकारः वक्तुं शक्यः। किन्तु कल्पज्योतिषयोः तदुत्तरकालीनः अनुष्ठानौपयिकः उपकारः वक्तव्यो भवति, यश्च मीमांसायाः अपि साधारणः एव।

---

1 पाणिनीयशिक्षायां श्लोकसङ्ख्या 41 & 42

2 पूर्वमीमांसायां जैमिनिसूत्रम् 3-1-3-1 (तृतीयाध्याये तृतीयपादे प्रथमाधिकरणे प्रथमम्)

किञ्च, एतेषामेव वेदाङ्गानां केषाञ्चित् वेदोपकारकत्वं मीमांसां द्वारीकृत्यापि क्वचित् भवतीति वेदाङ्गैः वेदोपकारे कर्तव्ये मीमांसाद्वारकत्वमपि भवति इत्यपि कश्चन अवान्तर-विचारः आनेतुं शक्यः। अयञ्च विषयः अर्थात् अन्यशास्त्रं द्वारीकृत्य वेदोपकारः केनचित् शास्त्रेण क्रियते इति विषयः सुतरां न नूतनः। यतो हि एतादृशः उपकारः वेदाङ्गानां मध्ये एव क्वचित् द्रष्टुं शक्यः। यथा शिक्षाशास्त्रेण वर्णानां स्वरादीनाञ्च उत्पत्तिं तत्स्थान-प्रयत्नादिकं च ज्ञात्वा वेदे अधीते, तदर्थज्ञानकाले व्याकरणशास्त्रानुसारं तत्तत्स्वरघटितपदस्य बहुव्रीह्यनुसारेण विग्रहः कर्तव्यो वा तत्पुरुषाश्रितः वा विग्रहः इति अन्याङ्गसाहाय्येन परम्परया वेदोपकारकत्वं द्रष्टुं शक्यते।

एवंरीत्या तर्हि मीमांसाद्वारकः उपकारः वेदाङ्गस्य अस्ति वा इति चेत् बहूनि मीमांसायाम् अधिकरणानि सन्ति। यथा, पूर्वमीमांसायां पञ्चमाध्यायस्य चतुर्थपादे सप्तमाधिकरणे – "य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां वा पौर्णमास्यां वा यजेत" इति वाक्यमादाय कश्चन विचारः प्रवृत्तः, यत्र ज्योतिषवचनान्यादाय निर्णयः कर्तव्यो भवति।

तथा हि – "य इष्ट्या पशुना..." इति वाक्येन न तावत् प्रकृतिभूत-इष्टिपशु-सोमयागेषु पर्वकालः विधीयते, "पक्षान्ताः उपवस्तव्याः पक्षद्वयोऽभियष्टव्याः" इत्यादिवचनेन प्रतिपद्कालस्य विधानात्। प्रतिपद्कालो विहितश्चेत् 'दर्शपूर्णमासेष्टिः' इति संज्ञाकरणं कथं सङ्गच्छते इति चेत् दर्शपूर्णमासारम्भद्वारक-सम्बन्धमादाय उपपद्यते इति वक्तव्यम्।

"य इष्ट्या पशुना..." इत्यनारभ्याधीतवाक्यं तु विकृतीष्टिपशुसोमपरम् इति अङ्गगुणविरोधन्यायादिसाहाय्येन वक्तुं शक्यते। ननु विकृतावपि दर्शविकृतिभूतेषु दर्शकालः, पौर्णमासीविकृतिभूतेषु पौर्णमासीकालश्च अतिदेशादेव प्राप्नोति इति स्थिते एतद्वचनं किमर्थम्? इति चेत्, उच्यते – अतिदेशतः प्राप्तद्व्यहकालस्य बाधार्थमयमुपदेशः इति। तथा च विकृति-यागानाम् उत्पत्तिविधिना यः यागः प्राप्तः, तदनुपदम् अतिदेशेन यः प्राकृतः प्रयोगः प्राप्तः, तमेव प्रयोगमनूद्य पौर्णमास्यादि-कालः विधीयते। तेन च साङ्गः एव

विकृतिप्रधानकालः पर्वकालकर्तव्यतया प्राप्तः इति अन्वाधानादेरपि प्रधानेन सहैव पर्वकालप्राप्तिः इति फलति।

तत्र च यत्र पर्वसन्धिः (पर्वप्रतिपदोः सन्धिः = मेलनम्) यत्र भवति, तत्र विकृतीष्टिर्वा आदौ अनुष्ठातव्या प्रकृतीष्टिर्वा इति विचारः कृतः। तत्र च अपराह्णसन्धिः स्याच्चेत् प्रातः एव विकृतिप्रयोगमारभ्य समाप्य च सायं प्रकृतीष्टेः कृते अन्वाधानम्। [तत्र च प्रकृतीष्ट्यङ्गभूतस्य अन्वाधानस्य प्रातःकालः विकृत्यङ्गभूत-औपदेशिक-अन्वाधानेन बाधितः भवत्येव] इति अपराह्णसन्धिदिने व्यवस्था।
यत्र च पूर्वाह्णे सन्धिः, तत्र औदयिकपर्वणः प्रकृत्यवरुद्धत्वात् तत्पूर्वदिने एव विकृतीष्टिं समाप्य (सायं च अन्वाधानमनुष्ठाय) परेद्युः क्रमेण प्रकृत्यनुष्ठानम् इति पूर्वाह्णसन्धिदिने व्यवस्था युक्त्या आलोचनं कुर्वतां मीमांसकानां सिद्ध्यति।

किन्तु धूर्तस्वाम्यादयः याज्ञिकास्तु अत्र विप्रतिपद्यन्ते। ते तु आवर्तने पूर्वसन्धौ वा प्रकृत्यनुष्ठानानन्तरं विकृत्यनुष्ठानम् इति मन्यन्ते। तत्र च कारणं 'पर्व' इति शब्दस्य पौर्णमास्यमावास्यादिवसयोः अन्तिमः क्षणः इत्यर्थः इति। तत्र च किं प्रमाणम् इति चेत् गोभिलगृह्यसूत्रम् उदाहरन्ति – " यः परमो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी", " यः परमः सन्निकर्षः सूर्याचन्द्रमसोः सा अमावास्या" इति। अतः परमः (अन्तिमः) सन्निकर्षः विप्रकर्षो वा पूर्वाह्णसन्धौ सन्धिदिने एव भवतीति कारणतः "य इष्ट्या..." इति वाक्येन विकृतीष्ट्याद्युद्देशेन तदवच्छिन्नदिनस्यैव लक्षणया विधानात् तद्दिने एव अनुष्ठानम् इति धूर्तस्वाम्यादिमतम्।

तत्तु एवं खण्ड्यते – "सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन् तासाममावास्यां च पौर्णमासीं च नोपैत्" इति अर्थवादबलात्, आपामरप्रसिद्धेः, **ज्योतिषशास्त्रवशाच्च** सूर्याचन्द्रमसोः सन्निकर्षविप्रकर्षक्षणावच्छिन्न-अहोरात्रकालः एव अर्थः इति भाट्टदीपिकाकाराः खण्डदेवाचार्याः तत्रभवन्तः प्रतिपादयन्ति। अत्र च अर्थवाद-प्रयोग-

ज्योतिषशास्त्राणां त्रयाणां क्रमेण प्रमाणीकरणे उत्तरोत्तरस्य प्राबल्ये पूर्वपूर्वस्य अस्वारस्यं च कारणम्।

ज्योतिषशास्त्रे हि "पर्वणो यश्चतुर्थोंशः आद्याः प्रतिपदस्त्रयः" इत्यादिः व्यवहारः, एवमेव पूर्वविद्धत्वं अपरविद्धत्वं तयोः तत्तत्कर्मसु ग्राह्यत्वं त्याज्यत्वम् इतीदं सर्वम् अन्त्यक्षणपरत्वपक्षे सुतरामनुपपन्नं भवति। अतः पौर्णमास्यमावास्याशब्दयोरपि तिथिवाचकत्वमेव (अहोरात्रपरत्वमेव) पूर्वोक्तप्रमाणानुरोधेन स्वीकर्तव्यम्। तथा च का नाम तिथिः इति जिज्ञासायां "अमासंज्ञकचन्द्रकलाव्यतिरिक्त-चन्द्रकलानां मध्ये एकैकस्याः कलायाः सूर्यमण्डलेन आद्यावयवविप्रकर्षादारभ्य अन्त्यावयवविप्रकर्षः, आद्यावयवसन्निकर्षादारभ्य अन्त्यावयवसन्निकर्षो वा यावता कालेन जायते तावान् कालः यथा क्रमं शुक्लपक्षकृष्णपक्षगतः प्रतिपद्द्वितीयादिशब्दप्रतिपाद्यः" इति निर्धार्यते।

एतादृशं निर्वचनं अत्र ज्योतिषशास्त्रबलादेव ज्योतिषशास्त्रबलादेव कृतम् इति मीमांसया वेदार्थे निर्णेतव्ये ज्योतिषं मीमांसायाः उपकरोति इति अस्मिन् स्थले ज्योतिषं मीमांसाद्वारा वेदोपकारकं भवति।

एवमेव तृतीयाध्यायस्थ तृतीये पादे अष्टमे अधिकरणे "तिस्र एव साह्नस्योपसदः, द्वादशाहीनस्य" इति वाक्यमादाय विचारे कृते, 'अहीन'- शब्दः अहस्साध्यक्रतुसमूहपरः वा अहस्समूहसाध्यक्रतुपरो वा इति सन्दिह्य "तस्य समूहः[3]" इत्यधिकारस्थात् "अह्नः खः क्रतौ[4]" इति व्याकरणसूत्रबलात् अहस्समूहसाध्यक्रतुविशेषः एव अर्थः इति निर्णयः कृतः। इति अत्रापि मीमांसाशास्त्रेण वेदार्थे निर्णेतव्ये व्याकरणस्मृतिः मीमांसाशास्त्रस्य उपकरोतीति ज्ञायते।

---

[3] व्याकरणे पाणिनिसूर्तम् 4-2-37 (चतुर्थाध्यायस्य द्वितीयपादे सप्तत्रिंशत्तमम)

[4] वय्यकरण-वार्तिके

इत्येवं रीत्या क्वचित् वेदाङ्गानि मीमांसां द्वारीकृत्यापि वेदस्य उपकुर्वन्ति इति स्थिते, वेदोपकारस्य तावत् षडङ्गानां मीमांसायाश्च तुल्यत्वात् कथं तर्हि मीमांसायाः परिगणनं षड् वेदाङ्गेषु न कृतम् इति चिन्तायाम् 'उपकारकत्वम् अङ्गत्वम्' इति यत् बादरि-मतानुसारेण उक्तं, तत् त्यक्त्वा जैमिनीयमेव मतं "शेष परार्थत्वात्[5]" इति सूत्रस्वारस्यात् "परोद्देशप्रवृत्तकृतिकारकत्वेन विहितत्वम्[6]" इति यत् परिष्कृतं तत् स्वीकृत्य चिन्तयामश्चेत् वेदाङ्गतया मीमांसायाः अपरिगणने कारणमवगन्तुं शक्नुमः। यतो हि अत्र अङ्गत्वलक्षणघटक-'पर'शब्देन अङ्गिनः स्वीकारात्, अङ्गी= वेदः, तदुद्देशप्रवृत्तपुरुषकृतौ कारकत्वेन षडङ्गानि विहितानि। विधिश्च – "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च[7]" इति विधिः। न तावदनेन विधिना वेदाध्ययनं साङ्गवेदाध्ययनं वा विधीयते। वेदाध्ययनस्य "स्वाध्यायोऽध्येतव्यः" इति वचनेनैव प्राप्तत्वात् अतः वेदाङ्गानाम् अध्ययनमेव अनेन विधिना विधीयते इति अयमेव विधिः वेदाध्ययनं विदधत् विहितत्वघटितमङ्गत्वमपि शिक्षादीनां सूचयति। अत्र च मीमांसायाः अनन्तर्भावात् न तस्याः वेदाङ्गत्वेन परिगणना।

मीमांसायास्तु "अथातो धर्मजिज्ञासा" इति सूत्रबलात् वेदाध्ययनानन्तर्यमेव ज्ञायते। अथ = वेदाध्ययनानन्तरम्, अतः = वेदस्य विवक्षितार्थत्वात् धर्मजिज्ञासा = धर्मविषयिणी जिज्ञासा कर्तव्या भवति इति। साङ्गवेदाध्येतुः अधीतव्याकरणनिरुक्तादिवशात् अर्थज्ञानसम्पन्नस्य सन्दिग्धार्थनिर्णायकतया मीमांसापठनम् उपकरोति।

तदुक्तम् –

---

5 पूर्वमीमांसायां जैमिनिसूत्रम् 3-1-1 (तृतीयाध्याये तृतीयपादे प्रथमाधिकरणे)

6 भाट्टदीपिकायां 3-1-1 (तृतीयाध्याये तृतीयपादे प्रथमाधिकरणे)

7 व्याकरण - महाभाष्ये पस्पशाह्निके शास्त्रप्रयोजनाधिकरणम्

**"धर्मे प्रमीयमाणे हि वेदेन करणात्मना।**
**इतिकर्तव्यताभागं मीमांसा पूरयिष्यति[8]॥"** इति।

अत एव इदमप्युक्तम् –

**"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः[9]॥"** इति। च

अत्र च 'तर्क'शब्दस्य मीमांसा इत्यर्थः। अत एव इदमप्युक्तम् –

**"मीमांसासंज्ञकस्तर्कः सर्ववेदसमुद्भवः ।**
**सोऽतो वेदो रुमाप्राप्तकाष्ठाब्धिलवणात्मवत्[10]॥"** इति।

---

8 श्लोकवार्तिके

9 मनुस्मृतौ

10 तन्त्रवार्तिके उद्धृतमिति तात्पर्यटिकायाम् उद्धरणम्।

## ISARA INSTITUTE OF MANAGEMENT & PROFESSIONAL STUDIES




R S E A R C H G A T E W A Y







A R O G Y A M O N L I N E

## PARIVARTAN PSYCHOLOGY CENTER






**भारतीय भाषा, शिक्षा, साहित्य एवं शोध**

**ISSN 2321 – 9726**

**WWW.BHARTIYASHODH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SCIENCE & TECHNOLOGY**

**ISSN – 2250 – 1959 (0) 2348 – 9367 (P)**

**WWW.IRJMST.COM**

**INTERNATIONAL RESEARCH JOURNAL OF COMMERCE, ARTS AND SCIENCE**

**ISSN 2319 – 9202**

**WWW.CASIRJ.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES**

**ISSN 2277 – 9809 (0) 2348 - 9359 (P)**

**WWW.IRJMSH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF SCIENCE ENGINEERING AND TECHNOLOGY**

**ISSN 2454-3195 (online)**

**WWW.RJSET.COM**

**INTEGRATED RESEARCH JOURNAL OF MANAGEMENT, SCIENCE AND INNOVATION**

**ISSN 2582-5445**

**WWW.IRJMSI.COM**

**JOURNAL OF LEGAL STUDIES,POLITICS AND ECONOMICS RESEARCH**

**WWW.JLPER.COM**